वैयाकरणसिद्धान्तकौमुदी

अजन्तपुँल्लिङ्गप्रकरणम् (१४)

११.०२.२०११

आकारान्तः पुंलिङ्गः विश्वपाशब्दः

- विश्वं पाति (रक्षणार्थकः 'पा' धातुः)
- विश्व अम् पा (विच्) व् ('अन्येभ्योऽपि दृश्यन्ते' – ३.२.७४ – इति विच्प्रत्ययः)
- विश्व अम् पा ('वेरपृक्तस्य' – ६.१.६७ – इति वकारलोपः)
- विश्व अम् पा ('उपपदमतिङ्' – २.२.१९ – इति उपपदसमासः)
- विश्वपा ('सुपो धातुप्रातिपदिकयोः' – २.४.७१ – इति प्रत्ययलोपः)
- विश्वपा ('कृत्तद्धितसमासाश्च' – १.२.४६ – इति प्रातिपदिकसंज्ञा)

- विश्वपा सुँ ('स्वौजसमौट्....' – ४.१.२ – इति प्रथमैकवचने विवक्षिते सुप्रत्ययः)
- विश्वपा स् ('उपदेशेऽजनुनासिक इत्' – १.३.२ – इति उकारस्य इत्संज्ञा, 'तस्य लोपः' – १.३.९)
- विश्वपा रुँ ('ससजुषो रुः' – ८.२.६६ – इति पदान्तस्य सकारस्य रुत्वम्)
- विश्वपा र् ('उपदेशेऽजनुनासिक इत्' – १.३.२ – इति उकारस्य इत्संज्ञा, 'तस्य लोपः' – १.३.९)
- विश्वपाः ('खरवसानयोर्विसर्जनीयः' – ८.३.१५ – इति रेफस्य विसर्गः)

- विश्वपा औ ('स्वौजसमौट्....' – ४.१.२ – इति प्रथमाद्विवचने विवक्षिते औप्रत्ययः)
  - 'प्रथमयोः पूर्वसवर्णः' – ६.१.१०२ – इति पूर्वसवर्णदीर्घे प्राप्ते,

२३९. दीर्घाज्जसि च (६.१.१०५)

- पदत्रयम् । दीर्घात्, जसि, च ।
- 'प्रथमयोः पूर्वसवर्णः' (६.१.१०२) इत्यतः 'पूर्वसवर्णः' इति, 'नादिचि' (६.१.१०४) इत्यतः 'न' इति, 'इचि' इति च अनुवर्तते ।
- दीर्घात् जसि इचि च परे पूर्वसवर्णदीर्घः न स्यात् ।
- वृद्धिः विश्वपौ ।
- विश्वपा औ
- विश्वपौ ('वृद्धिरेचि' – ६.१.८८ – इति वृद्धिः)

सवर्णदीर्घः विश्वपाः

- विश्वपा (जस्) अस्
- विश्वपास् (‘अकः सवर्णे दीर्घः’ – ६.१.१०१)
- विश्वपा (रुँ) र् (‘ससजुषो रुः’ – ८.२.६६)
- विश्वपाः (‘खरवसानयोर्विसर्जनीयः’ – ८.३.१५)

- यद्यपि इह औङि ‘नादिचि’ इत्येव सिद्धम् ।
- जसि तु सत्यपि पूर्वसवर्णदीर्घे क्षतिर्नास्ति ।
- तथापि ‘गौर्यौ’ ‘गौर्यः’ इत्याद्यर्थं सूत्रम् इहापि न्याय्यत्वाद् उपन्यस्तम् ।

- हे विश्वपाः
- हे विश्वपौ
- हे विश्वपाः

- विश्वपा अम् (‘स्वौजसमौट्....’ – ४.१.२ – इति द्वितीयैकवचने विवक्षिते अम्प्रत्ययः)
- विश्वपाम् (‘अमि पूर्वः’ – ६.१.१०७ – इति पूर्वरूपम्)

- विश्वपौ

२४०. आतो धातोः (६.४.१४०)

- पदद्वयम् । आतः, धातोः ।
- 'अङ्गस्य' (६.४.१), 'भस्य' (६.४.१२९) इति अधिक्रियेते । 'अल्लोपोऽनः' (६.४.१३४) इत्यतः 'लोपः' इत्यनुवर्तते ।
- आकारान्तो यो धातुः, तदन्तस्य भस्य अङ्गस्य लोपः स्यात् ।
- 'अलोऽन्त्यस्य' (१.१.५२) इति अन्त्यस्य आकारस्य लोपः ।
- विश्वपा (शस्) अस् ('स्वौजसमौट्….' – ४.१.२ – इति द्वितीयाबहुवचने विवक्षिते शस्प्रत्ययः)
- विश्वप् अस् ('यचि भम्' – १.४.१८ – इति भसंज्ञायाम् 'आतो धातोः' – ६.४.१४० – इति आकारस्य लोपः)
- विश्वपः

- विश्वपा (टा) आ (‘स्वौजसमौट्….’ – ४.१.२ – इति तृतीयैकवचने विवक्षिते टाप्रत्ययः)
- विश्वप् आ (‘यचि भम्’ – १.४.१८ – इति भसंज्ञायाम् ‘आतो धातोः’ – ६.४.१४० – इति आकारस्य लोपः)
- विश्वपा

- विश्वपाभ्याम्
- एवं शङ्खध्मादयः (शङ्खं धमति इति शङ्खध्माः)

आकारान्तः पुँल्लिङ्गः विश्वपाशब्दः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	विश्वपाः	विश्वपौ	विश्वपाः
सम्बोधनप्रथमाविभक्तिः	हे विश्वपाः	हे विश्वपौ	हे विश्वपाः
द्वितीयाविभक्तिः	विश्वपाम्	विश्वपौ	विश्वपः
तृतीयाविभक्तिः	विश्वपा	विश्वपाभ्याम्	विश्वपाभिः
चतुर्थीविभक्तिः	विश्वपे	विश्वपाभ्याम्	विश्वपाभ्यः
पञ्चमीविभक्तिः	विश्वपः	विश्वपाभ्याम्	विश्वपाभ्यः
षष्ठीविभक्तिः	विश्वपः	विश्वपोः	विश्वपाम्
सप्तमीविभक्तिः	विश्वपि	विश्वपोः	विश्वपासु

- धातोः किम्?
- हाहान्
- ‘हाहा’ इति गन्धर्वविशेषवाचकम् अव्युत्पन्नं प्रातिपदिकम् । धातोरयम् आकारो न । तस्माद् ‘आतो धातोः’ इति न प्रवर्तते ।
- हाहाः हाहौ हाहाः
- हाहाम् हाहौ
- हाहा (शस्) अस्
- हाहास् (‘प्रथमयोः पूर्वसवर्णः’ – ६.१.१०२ – इति पूर्वसवर्णदीर्घः)
- हाहान् (‘तस्माच्छसो नः पुंसि’ – ६.१.१०३ – इति नत्वम्)

ᘛ टा सवर्णदीर्घः हाहा

ᘛ हाहा (टा) आ

ᘛ हाहा ('अकः सवर्णे दीर्घः' – ६.१.१०१)

ᘛ हाहाभ्याम्

ᘛ ङे वृद्धिः हाहै

ᘛ हाहा (ङे) ए

ᘛ हाहै ('वृद्धिरेचि' – ६.१.८८)

- ङसिङसोर्दीर्घः हाहाः
- हाहा (ङसि / ङस्) अस्
- हाहास् ('अकः सवर्णे दीर्घः' – ६.१.१०१)
- हाहा (रुँ) र् ('ससजुषो रुः' – ८.२.६६)
- हाहाः ('खरवसानयोर्विसर्जनीयः'- ८.३.१५)

- ओसि वृद्धिः हाहौः
- हाहा ओस्
- हाहौस् ('वृद्धिरेचि' – ६.१.८८)
- हाहौर् ('ससजुषो रुः' – ८.२.६६)
- हाहौः ('खरवसानयोर्विसर्जनीयः'- ८.३.१५)

- ङौ आद् गुणः हाहे ।
- हाहा (ङि) इ
- हाहे   (‘आद्गुणः’ – ६.१.८७)
- शेषं विश्वपावत् ।

आकारान्तः पुँल्लिङ्गः हाहाशब्दः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	हाहाः	हाहौ	हाहाः
सम्बोधनप्रथमाविभक्तिः	हे हाहाः	हे हाहौ	हे हाहाः
द्वितीयाविभक्तिः	हाहाम्	हाहौ	हाहान्
तृतीयाविभक्तिः	हाहा	हाहाभ्याम्	हाहाभिः
चतुर्थीविभक्तिः	हाहै	हाहाभ्याम्	हाहाभ्यः
पञ्चमीविभक्तिः	हाहाः	हाहाभ्याम्	हाहाभ्यः
षष्ठीविभक्तिः	हाहाः	हाहौः	हाहाम्
सप्तमीविभक्तिः	हाहे	हाहौः	हाहासु

गीतगोविन्दसंस्कृतसङ्घः - २०१०

- ‘आतः’ इति योगविभागाद् अधातोरपि आकारलोपः क्वचित् ।
- क्त्वः । श्नः ।
- ‘समासेऽनञ्पूर्वे क्त्वो ल्यप्’ (७.१.३७), ‘क्रमश्च क्त्वि’ (६.४.१८) ।
- ‘हलः श्नः शानज्झौ’ (३.१.८३)
- एतयोः धातुत्वाभावात् कथम् आल्लोपः? इति चेत्, योगविभागः क्रियते ।
- क्त्वा + (ङस्) अस्
- क्त्व् अस् (’आतः’ इति आकारलोपः)
- क्त्वः
- एवं श्नः ।

- इकारान्तः पुँल्लिङ्गः 'हरि' शब्दः ।
- हरि (सुँ) स् ('स्वौजसमौट्...' – ४.१.२ – इति प्रथमैकवचने सुप्रत्ययः)
- हरि (रुँ) र् ('ससजुषो रुः' – ८.२.६६)
- हरिः ('खरवसानयोर्विसर्जनीयः' – ८.३.१५)

- हरि औ ('स्वौजसमौट्...' – ४.१.२ – इति प्रथमाद्विवचने औप्रत्ययः)
- हरी ('प्रथमयोः पूर्वसवर्णः' – ६.१.१०२)

- हरि (जस्) अस्
  - पूर्वसवर्णदीर्घे प्राप्ते,

२४१. जसि च (७.३.१०९)

- पदद्वयम् ।
- ‘अङ्गस्य’ (६.४.१) इत्यधिक्रियते । ‘ह्रस्वस्य गुणः’ (७.३.१०८) इत्यनुवर्तते ।
- ह्रस्वान्तस्य अङ्गस्य गुणः स्यात् जसि परे ।

- हरि अस्
  - ‘अलोऽन्त्यस्य’ (१.१.५२) इति अन्त्यस्य इकारस्य गुणः ।
  - ‘स्थानेऽन्तरतमः’ (१.१.५१) इति प्रमाणतः आन्तर्येण अकारे, स्थानतः आन्तर्येण इकारे च प्राप्ते,
  - ‘यत्रानेकविधमान्तर्यं तत्र स्थानतः आन्तर्यं बलीयः’ (प) । इति इकारस्य गुणः एकारः ।
- हरे अस् (‘जसि च’ – ७.३.१०९ – इति गुणः)
- हरयस् (‘एचोऽयवायावः’ – ६.१.७८ – इति अयादेशः)
- हरयः (रुत्वविसर्गौ)

- हे हरि (सुँ) स्
  - 'एङ्ह्रस्वात् सम्बुद्धेः' – ६.१.६९ – इति सम्बुद्धिलोपे प्राप्ते,

२४२. ह्रस्वस्य गुणः (७.३.१०८)

- पदद्वयम् ।
- ‘अङ्गस्य’ (६.४.१) इत्यधिक्रियते । ‘सम्बुद्धौ च’ (७.३.१०६) इत्यतः ‘सम्बुद्धौ’ इति अनुवर्तते ।
- ह्रस्वस्य गुणः स्यात् सम्बुद्धौ ।
- हे हरि स्
- हे हरे स् (‘ह्रस्वस्य गुणः’ – ७.३.१०८)
- हे हरे (‘एङ्ह्रस्वात् सम्बुद्धेः’ – ६.१.६९)
- हे हरी
- हे हरयः

- हरि अम् (‘स्वौजसमौट्...’ – ४.१.२ – इति द्वितीयैकवचने अम्प्रत्ययः)
- हरिम् (‘अमि पूर्वः’ – ६.१.१०७ – इति पूर्वरूपम्)

- हरी

- हरि (शस्) अस् (‘स्वौजसमौट्...’ – ४.१.२ – इति द्वितीयाबहुवचने शस्प्रत्ययः)
- हरीस् (‘प्रथमयोः पूर्वसवर्णः’ – ६.१.१०२)
- हरीन् (‘तस्माच्छसो नः पुंसि’ – ६.१.१०३)